दि.०८/०४/२०१८


कर्म
फल
संचित
प्रारब्ध
क्रियमाण
सकाम
निष्काम
ब्रह्मज्ञानरहित
ब्रह्मज्ञानसहित
भगवदाज्ञा परिपालनार्थ
लोकसंग्रहार्थ
प्रारब्धक्षयार्थ
निरहंकारितया
निर्ममतया
साहंकार
ममतारहित
लोकसंग्रहार्थ
सांख्य
योग
स्वरूपावस्थान

# स्वदासार्थमहाप्रभुकृतसाधन

- शास्त्राचयन
  - पत्रावलंबन
  - शास्त्रार्थ
  - सर्वनिर्णय
  - भागवतार्थ
  - भाष्य
- स्वाचारेस्थापन
  - सूक्ष्मटीका
  - सुबोधिनी
- स्वीयोपदेश
  - नामात्मक
    - पुरुषोत्तमसहस्रनाम
    - त्रिविधनामावली
    - अनुक्रमणिका
  - लीलात्मक — मधुराष्टक
  - उपदेशात्मक — षोडशग्रंथ, पंचश्लोकी

## तादात्म्यम्

दि.१०/०४/२०१८

‘तादात्म्य’पदवाच्यस्य प्रतिपत्तिर्द्विधा मता।।
आद्या ज्ञातृनिरपेक्षा सापेक्षा द्वितीया पुनः ।।१।।
अंशिनः पारदस्यात्मविभक्तिः पतनादिभिः ।।
एकस्यांशेषु बहुषु तादात्म्यं प्रतिपद्यते।।
पारदस्य स्वभावेन न तत्संकल्पतः क्वचित्।।
शुक्राणोरंशिनश्चैकस्यांगादिभेदभिन्नता।।३।।
भवितुं सर्वसमर्थस्य स्याद् डिम्बानुधाविनः।।
तादात्म्ये वस्तुभूते द्वे ज्ञातुस्तत्रानपेक्षणात्।।४।।
सापेक्षेऽपि तथा ज्ञेये ज्ञातुर्बुद्धिकृते मते।।
उपचारान्यथारोपात् भेदाभेदयोर्द्विधा।।५।।
‘ममात्मायं भद्रसेनो’ह्यभेदारोपणात्मकः।।
‘राहोः शिरम्’अभेदे हि भेदारोपणान्मतम्।।६।।
विवेकोयं समाख्यातः तादात्म्यार्थावधारणे।।
वर्णितो यस्य बोधात्तु संशयान्मुच्यते जनः।।७।।

दि.११/०४/२०१८

इतरेतरोपमर्दाद् विचाररीतिभ्रमोदभूतम्
पुराणं सौरभस्यैतत् स्वोपमर्दि कुतो नहि? ।।१।।
एका फाधरविलसनस्य तु पुरास्मत्संस्कृते: द्वेषिण:
करसनदाससुधारकस्य हि मतावुद्भासिता द्वेषत:
सा वै सौरभविभ्रमात् पुनरपि ह्युज्जृम्भिता लेखने
गीताभक्तिभरात्पुराणविषये द्वेषैकरूढा मति: ।।२।।
अन्याचांग्लनरेन्द्रभक्तविरजानंदाद् दयानन्दगा
वेदेतरनिखिलेऽपि शास्त्रनिचये नास्तिक्यबुद्ध्यात्मिका
दन्तल्याश्रमवासिसौरभगुरो: तत्रापि चार्धामति:
शिवविष्णवोरवतारवर्णनकथारिक्ते तु श्रद्धामते: ।।३।।
असमंजसश्रद्धालो: श्रीनाथे सौरभस्य वै
कृष्णावतारमूर्तौ हि श्रद्धादम्भो महान् यत: ।।४।।

दि.१४/०४/२०१८



# पुराणविमर्श

१. वेदादपि पुरातनत्वेन ''पुराणं कस्मात् पुरा नवं भवति'' (निरु.३।४।११९)

''पुराणप्रोक्तश्चेद् ब्राह्मणकल्पां भवन्ति'' (पाणि.४।३।१०५)

''यत् स्वाध्यायमधीयीत एकामपि ऋचं यनुस्साम वा तद् ब्रह्मयज्ञ सन्तिष्ठते. यद् ब्राह्मणानि इतिहासान् पुराणानि'' (तैत्ति.ब्रा.२।९)

२. वेदेष्वपि वेदवद् मान्यत्वेन इतिहासं पुराणं च वेदानां पञ्चमो वेद: (छान्दो.उप.७।९।२)

इतिहास - घटनाप्रधान
पुराण - सर्गप्रतिसर्ग (विसर्ग)
मन्वन्तर - वंशवंशानुचरित्

३. वशिष्ठशक्तिपराशरव्यासादि ऋषीनाम् उभयत्र सत्त्वात् शाखाभेदकस्य जय-पुराणभेदकत्वाच्च

४. देवतानामपि अनेक्येऽपि एकस्यापि सर्वरूपत्वेन सर्वेषां समत्वात्

५. वेदान्तप्रयोजन (विज्ञान + वैराग्य) पूरकत्वात् तमेवैकं जानथ अन्या वाचो विमुञ्चथ.

६. चतुष्पद्ब्रह्मणा चतुष्पद्बृहत्या ([१]प्रत्यक्ष [२]स्मृति [३]तर्क [४]शब्दरूप-सर्वशाब्दबोधै: ज्ञानम्)

## श्लोक सन्दर्भ

आचार्यस्वरूपाधिकारकर्तव्यविवेचनम्

आचारं ग्राहयति आचिनोति बुद्धिम् आचिनोति अर्थम् (निरु.१।२२)

उत त्वं सख्ये स्थिरपीतम् आहु: नैनं हिन्वन्ति वाजिनेषु, अधेन्वा चरति मायथैष वाचं शुश्रुवां अफलाम् अपुष्पाम् (ऋक्.सं.२।३३)

याज्ञदैवते पुष्पफले देवताध्यात्मे वा (निरु.१।६।२०)

मनुष्या: वा ऋषिषु उत्क्रामत्सु देवान् अब्रुवन् ''को न ऋषि: भविष्यति'' तेभ्य एतं तर्कम् ऋषिं प्रायच्छन् मन्त्रार्थचिन्ताभ्यूहम् अभ्यूहम्. तस्माद् यदेव किञ्चन् अनूचानो अभ्यूहति आर्षं तद् भवति (निरु.१३।१२)

आचार्य: उपनयमानो ब्रह्मचारिणं कृणुते गर्भगतं तिस्र रात्री उदरे बिभर्ति. तं जातं द्रष्टुम् अभिसंयति देवा: .. आचार्य: ततक्ष नभसी उभे इमे उर्वी गम्भीरे पृथिवीं दिवं च ते रक्षति तपसा ब्रह्मचारी तस्मिन् देवा: संमनसो भवन्ति (अथर्ववेद.११।७।३-८)

आचार्याद्धेव विद्या विदिता साधिष्ठं प्रापयति (छान्दो.उप.४।९।३)

ते होचु: एषा अस्मद्विद्या आचार्यस्तु ते गतिं वक्ता (छान्दो.उप.४।१४।१)

सर्वोद्धारप्रयत्नात्मा कृष्ण: प्रादुर्बभूव ह।<br>
तथात्वं येन संसिध्येत् तदर्थं व्यास उक्तवान्।।१।।<br>
श्रीभागवतम् अत्यन्तं सर्वेषां सुखदायकम् ।<br>
तस्यापि तत्त्वं येनैव सिध्येदिति विचार्य हि ।।२।।

अग्निश्चकार तत्त्वार्थदीपं भागवते महत् ।
तच्चापि येन संसिध्येद् व्याख्यानं तन्निरूप्यते ।।३ ।।...
वेदान्ते च स्मृतौ ब्रह्मलिङ्गं भागवते तथा।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ।।
त्रितये त्रितयं वाच्यं क्रमेणैव मयाऽत्र हि ।।६ ।।
वेदाः श्रीकृष्णवाक्यानि व्याससूत्राणि चैव हि।
समाधिभाषा व्यासस्य प्रमाणं तच्चतुष्टयम् ।।७ ।।...
पुराणेष्वपि सर्वेषु तत्तद्रूपो हरिस्तथा ।।१२ ।।
भजनं सर्वरूपेषु फलसिद्ध्यै तथापि तु।...
अधुना ह्यधिकारास्तु सर्वएव गताः कलौ।
कृष्णश्चेत् सेव्यते भक्त्या कलिस्तस्य फलाय हि ।।१९ ।। (शास्त्र.प्रक.१-१९)

श्रद्धाया देवो देवत्वम् अश्नुते श्रद्धा प्रतिष्ठा लोकस्य देवी (तै.ब्रा.३।१२।१)
श्रद्धादेवी प्रथमजा ऋतस्य विश्वस्य जगतः प्रतिष्ठा

यः छन्दसाम् ऋषभो विश्वरूपः छन्दोभ्यः छन्दांसि आविवेश
(महाना.उप.४।६)

यो यो यां यां तनुं भक्तः श्रद्धया अर्चितुम् इच्छति।
तस्य तस्य अचलां श्रद्धां तामेव विदधामि अहम् ॥ (भग.गीता.७।२१)

ये यथा मां प्रपद्यन्ते तान् तथैव भजामि अहम् (भग.गीता.४।११)

त्वं भावयोगपरिभावितहृत्सरोज आस्से श्रुतेक्षितपथो ननु नाथ पुंसाम् ।
यद्यद्धिया त उरुगाय विभावयन्ति तद्तद्वपुः प्रणयसे सदनुग्रहाय ॥
(भाग.पुरा.३।९।११)

प्रेयः – शतायुषान् पुत्रपौत्रान् वृणीश्व बहून् पशून हस्तिहिरण्यम् अश्वान् भूमेः महदायतनं वृणीश्व स्वयं च जीव शरदो यावद् इच्छसि (कठोप.१।१।२३)

श्रेयः – श्वोभावा मर्त्यस्य यद् अन्तक! एतत् सर्वेन्द्रियाणां जरयन्ति तेजः अपि सर्वं जीवितम् अल्पमेव तवैव वाहाः तव नृत्यगीते. न वित्तेन तर्पणीयो मनुष्यो लप्स्यामहे वित्तम् अद्राक्ष्म चेत् त्वा जीविष्यामो यावद् ईशिष्यसि त्वं वरस्तु मे वरणीयः स एव (कठोप.१।१।२६–२७)

स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषो अन्तर्हृदय आकाशः तस्मिन् शेते सर्वस्य वशी सर्वस्य ईशानः सर्वस्य अधिपतिः स न साधुना कर्मणा भूयान् नो एव असाधुना कनीयान् एष सर्वेश्वर एष

भूताधिपतिरेष भूतपाल एष सेतुः विधरण एषां लोकानाम् असंभेदाय तमेतं वेदानुवचनेन ब्राह्मणाः विविदिषन्ति यज्ञेन दानेन तपसा अनाशकेन एतमेव विदित्वा मुनिर्भवति. एतमेव प्रव्राजिनो लोकम् इच्छन्तः प्रव्रजन्ति. एतद्ध स्म वा एतत् पूर्वे विद्वांसः प्रजां न कामन्ते कि प्रजया करिष्यामो येषां नो अयम् आत्मा अयं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणाश्च व्युत्थाय अथ भिक्षाचर्यं चरन्ति (बृह.उप.४।४।२२)

धर्मस्य ह्यापवर्गस्य न अर्थो अर्थाय उपकल्पते।
न अर्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ।।
कामस्य न इन्द्रियप्रीतिः लाभो जीवेत यावता ।
जीवस्य तत्त्वजिज्ञासा न अर्थो यश्च इह कर्मभिः ।।
वदन्ति तत् तत्त्वविदः तत्त्वं यज्ज्ञानम् अद्वयम् ।
ब्रह्मेति परमात्मेति भगवान् इति शब्द्यते ।।
तच्छ्रद्दधाना मुनयो ज्ञानवैराग्ययुक्तया ।
पश्यन्ति आत्मनि च आत्मानं भक्त्या श्रुतगृहीतया।। (भाग.पुरा.१।२।९-१२)

अमीसा देवा: मिस्सा कता Vrs देवानाम् इतरेतररूपता श्रद्धाहेतुकं भजनं

इन्द्रमित्रं वरुणं अग्निम् आहु: उभो दिव्य: सुपर्णो गरुत्मान्
एकं सद् विप्रा: बहुधा वदन्ति अग्निं यमं मातरिश्वानम् आहु:
(ऋक्.सं.१।१६४।५०)

त्वम् अग्न इन्द्रो वृषभ: सताम् असि त्वं विष्णु: उरुगायो नमस्य:
त्वं ब्रह्मा रयिविद् ब्रह्मणस्पते त्वं विधर्त: रुचसे पुरेध्या
त्वमग्ने रुद्रो असुरो महो दिव: त्वं शर्धो (ऋक्.सं.२।१।३६)

रूपं रूपं मघवा बोभवीति माया: कृण्वान: तन्वं परिस्वाम् त्रिर्यद् दिव:
परिमुहूर्तम् आगात् स्वै मन्त्रै: अनृतुपा ऋतावा(न्) (ऋक्.सं.३।३।२०)

कासीत् प्रमा प्रतिमा किं निदानं आसीत् छन्द: किम् आसीत् प्रउगं किम् उक्थं
यद्देवा देवा: अयजन्तं विश्वे (ऋक्.सं.८।७।१८)

सत: असत: प्रतिमानं पूरोभू: विश्वा वेद जनिमा (ऋक्.सं./अथर्व.३।२।६८)

आद्योऽवतार: पुरुष: परस्य काल: स्वभाव: सदसन्मनश्च ।
द्रव्यं विकारो गुण इन्द्रियाणि विराट् स्वराट् स्थास्नु चरिष्णु भूम्न: ।।
अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च ।
स्वर्लोकपाला: खगलोकपाला नृलोकपालास्तललोकपाला: ।।
गन्धर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथा: ।
ये वा ऋषीणामृषभा: पितृणां दैत्येन्द्रसिद्धेश्वरदानवेन्द्रा: ।
अन्ये च ये प्रेतपिशाचभूतकूष्पाण्डयादोमृगपक्ष्यधीशा: ।।
यत्किं च लोके भगवन्महस्वदोज: सहस्वद् बलवत् क्षमावत् ।
श्रीह्रीविभूत्यात्मवदद्भुतार्णं तत्त्वं परं रूपवदस्वरूपम् ।।
प्राधान्यतो यानृष आमनन्ति लीलावतारान् पुरुषस्य भूम्न: ।

आपीयतां कर्णकषायशोषान् अनुक्रमिष्ये त इमान् सुपेशान् ।।
(भाग.पुरा.२।६।४१-४५)

तद् ये अनादिष्टादेवता: मन्त्रा: तेषु देवतोपपरीक्षा. यद्देवत: स यज्ञो वा यज्ञांगं वा तद्देवता भवति. अथ अन्यत्र यज्ञात् प्राजापत्या इति याज्ञिका: नराशंसा (अग्नि:/यज्ञ:) इति नैरुक्ता:. अपिवा सा कामदेवता स्यात् ... अपि ह्यदेवता देवतावत् स्तूयन्ते यथा अश्वप्रभृतीनि औषधिपर्यन्तानि ... महाभाग्यात् देवताया: एक आत्मा बहुधा स्तूयते. एकस्य आत्मनो अन्ये देवा: प्रत्यंगानि भवन्ति. अपि च सत्त्वानां प्रकृतिभूमभि: ऋषय: स्तुवन्ति इति आहु: प्रकृतिसार्वनाम्न्यात् च. इतरेतरजन्मानो भवन्ति इतरेतरप्रकृतयो: कर्मजन्मान: (कर्मणे जन्म येषां ते) आत्मजन्मान: ... तिस्रएव देवता इति नैरुक्ता:. अग्नि: पृथिवीस्थानो वायुर्वा इन्द्रो वा अन्तरिक्षस्थान: सूर्यो द्युस्थान:. तासां महाभाग्याद् एकैकस्या: अपि बहूनि नामधेयानि. अपि कर्मपृथक्वात् ... तदेतत् नरराष्ट्रमिव. अथ आकारचिन्तनं देवतानां. पुरुषविधा: स्यु: इति एकम् अपुरुषविधा: स्यु: इति अपरम्... अपि वा उभयविधा: स्यु:... तिस्रएव देवता इति उक्तं तासां भक्तिसाहचर्यं व्याख्यास्याम: (निरु.७।३।४-१०)

अग्निर्वै सर्वा: देवता: देवताभि: ऐतै: अस्य देवता आप्नोति, विष्णु: यज्ञो यज्ञेन, वाक्सरस्वती वाचा वाचं, ब्रह्म बृहस्पति: ब्रह्मणैव ब्रह्म आप्नोति (मैत्रा.सं.२।१।७)

य मान्थ्रा वचम मज़्दा वइइती
उर्वथो अषा नमंहा ज़रथुश्त्रो
दाता ख़्रतउश् हिज़्वा रइथीम् स्तोइ
मह्या राजश वोई साहि मनंहा

To me, Zarathostru the prophet and sworn friend of righteousness, depting voice with veneration , O wise one, may the creator of mind force show as good mind His precepts may be path of my tongue This the holy man through righteousness holds in his spirit the force which holds existence beneficent upto as a sworn friend (Yazn.44|2)

इहास्ति नास्ति इति य एक संशय: परस्य वाक्यै: न मम अत्र निश्चय: स वेत्थ तत्त्वं तपश्च शयेन. स्वयं ग्रहीष्यामि यद् अत्र निश्चितम् (बोधिच.१ ।७३)

To deliver the world having remembered all that he had heard before he again pondered resolved I shall explain it for the sake of delivering the world

(बोधिचर्या. 15|79|82)

यो धम्मं पस्सति सो बुद्धं पस्सति यो बुद्धं पस्सति सो धम्मं पस्सति (संयुक्तनि.३-१२०,दिद्धनिका.१३.तैविज्ज)

Moses said to Israel "know you not with what travel I gained the Torah. What toil what labor, I endured for it's sake. Forty days and forty nights I was with God my soul my blood I gave for Torah (Deuteronomy 13|6)

I am good shepherd. The good shepherd lays down his life for the sheep. He who is hiring and not a shepherd sees the wolf coming and leaves them scatters them. He flees because he is a hiring and cares nothing for the sheep. I know my own and my own know me as the Father knows me and I know my Father and I lay down my life for the sheep. (John 10|11-16)